# বৃষাদ্রিনাথস্তোত্রম্

{॥ বৃষাদ্রিনাথস্তোত্রম্ ॥}

শ্রীশেষশিখরিস্বামিন্ রমাভৃদ্বক্ষসস্তব

বিলসৎপদ্মসঙ্কাশৌ চরণৌ শরণং ভজে ॥

ত্বৎকল্যাণগুণাঙ্কিতামলবচঃপাळী সুধাস্যন্দিনী

নৃত্যন্তী বদনে স্বযং বিলসতে মূঢস্য মে শ্রীবিভো ।

ক্ষোণীমণ্ডলসংস্থসর্বরসিকা নন্দৌঘসন্দাযিনী

দুর্মাংসা শনতৎপরে বনমৃগে ব্যাপ্তা ন কিং চন্দ্রিকা ॥ ১॥

বেদাস্সর্বসুরেশ্বরাঃ কমলভূশ্শম্ভুশ্চ মন্বাদযঃ

স্তোতুং যস্য মহত্ত্বমক্ষমতমা ব্যাসাদযশ্চাভবন্ ।

ত্বদ্দাসস্ত্বদুপাশ্রিতস্তব সুতস্তস্মাদহং নির্ভযঃ

স্বামিংস্তাদৃশবৈভস্য ভবতঃ কর্তুং যতিষ্যে স্তুতিম্ ॥ ২॥

শ্রীবৎসাঙ্কযতীন্দ্রসংনুতহরে শ্রীবেঙ্কটাখ্যে গিরৌ

বৈকুণ্ঠাৎস্বযমাগতঃ প্রকৃতিসংশ্লিষ্টানিমান্ প্রাণিনঃ ।

ব্রহ্মাণ্ডান্তরসংস্থিতান্ হি কৃপযা পাতুং সদা বর্তসে

তস্মাদ্বিশ্ববিধাযিনস্তব কৃপা নির্হেতুকৈব ধ্রুবম্ ॥ ৩॥

প্রহ্লাদঃ করিরাঙ্ বিভীষণ ইতি খ্যাতাশ্চ ভক্তা হ্যমী

ভক্ত্যা লব্ধভবৎকৃপাপরিণতাং তাং লেভিরে সংপদম্ ।
তস্মাৎকেচিদহো সহেতুকপরাং ব্যাচক্ষিরে ত্বৎকৃপাং
তেষাং ভক্তিমনিন্দিতাং তব কৃপালব্ধাং কথং নোচিরে ॥ ৪॥

সর্বেষাং জগতাং হি রক্ষণবিধৌ সক্তা কৃপা তাবকী
কাকং ভূ ----- নিলযং সংরক্ষযন্নাদ্ভুতম্ ? ।
মোহাদ্দুর্বিষযেষু সক্তমনসাং পাপাত্মনামাদিমং
মিথ্যাদাস্যযুতং ত্বরক্ষদিতি মাং চিত্রং হরে শ্রীবিভো ॥ ৫॥

হে স্বামিন্ ভবরাজযক্ষ্মণি বহুপ্রারব্ধনানাময-
ব্যালীঢ ঢে ক্ষণদুর্ভরেতর গুরুতরৈ রন্যৈ রসাধ্যৈ পরম্ ।
মগ্নানাং জডতাজুষাং প্রতিপদং তাপত্রযীমূর্চ্ছযা
ক্লিন্নানাং সকলাত্মনাং বিজযতে সঞ্জীবনী ত্বৎকৃপা ॥ ৬॥

দাতৃণাং প্রবরেণ তেন ভবতা দেযং ধনং শাশ্বতং
সঙ্খ্যাতীতমনন্তমঙ্গলপদং প্রাপ্যং সুখান্বেষিণাম্ ।
ত্যক্ত্বা লোষ্টবিকাদিকাম্যমঘদং কাঙ্ক্ষন্তি যে ত্বৈহিকং
তান্মূঢানপি হে বিভো তব কৃপা মাতেব সংরক্ষতে ॥ ৭॥

সর্বেষাং জগতামধীশ্বর ইতি ত্বাং খ্যাপযন্ শ্রীবিভো
স্ফূর্জৎপ্রত্নচিরত্নরত্নখচিতঃ কোটীনতুল্যপ্রভঃ ।
ব্রহ্মেশানসুরেন্দ্রসর্বদিবিজৈঃ সংস্তূযমানস্য তে

সাক্ষান্মন্মথমন্মথস্য মকুটী সংরাজতে মস্তকে ॥ ৮॥

দেব ত্বন্মুখপঙ্কজোপরি মহাসৌরভ্যলোভাগতাঃ
স্নিগ্ধারালবিনীলকুন্তলগণা বল্লন্তি ভৃঙ্গা যথা ।
কর্ণাটোর্ণৌ চোৎপলকর্ণপূর বিসরৎকান্তি ছটারাজিতৌ
পশ্যে সুন্দরশষ্কুলীপরিচিতৌ শ্রীশেষভূভৃদ্বিভো ॥ ৯॥

কর্পূরার্পিতমূর্ধ্বপুণ্ড্রমলিকে বিভ্রাজতে সন্ততং
হারিদ্রং তিলকং চ শেষধরণীভৃদ্বল্লভ শ্রীবিভো ।
লাবণ্যামৃতপূরপূরিতমুখে কিং পুণ্ডরীকদ্বয়ং
ভাভাতীতি মহাদ্ভুতং জনযতে দ্বন্দ্বং হি তে নেত্রযোঃ ॥ ১০॥

ভ্রূভঙ্গাঙ্কযুতং শুচিস্মিতরুচিজ্যোৎস্নাপরিষ্কারিতং
সেবে ত্বন্মুখচন্দ্রমণ্ডলমহং ভৃস্তত্তমোহারিণম্ ।
স্বামিন্ শুক্রবৃহস্পতী চিরতরাত্তস্যোভযোঃ পার্শ্বযোঃ
ভ্রাজন্তাবিব রত্নপুঞ্জখচিতে দ্বে কুণ্ডলে গণ্ডযোঃ ॥ ১১॥

দন্তালিস্তব কুন্দকুড্মলততেস্তুল্যা পরং রাজতে
সৌগন্ধ্যাদহিচাম্পকেযকলিকাপ্রোদ্ভাসিকা নাসিকা ।
স্বামিন্ বিদ্রুমবিম্বযুগ্মমধরং ব্যাতন্বতে মাধুরী-
সৌরভ্যারুণতাশ্রযস্ত্বদধরঃ শ্রীশেষভূভৃদ্বিভো ॥ ১২॥

গ্রৈবেযাদিবিভূষণানুকলিতঃ কণ্ঠস্ত্বদীযো হরে
শেষাদ্রীশ সুবর্ণপট্টকলিতং শঙ্খং বিডম্বীযতে ।
চত্বারঃ কিল জাতপল্লবসুরক্ষোণীজশাখা ইব
দ্যোতন্তে তব বাহবঃ প্রবিলসদ্রত্নাঙ্গদালঙ্কৃতাঃ ॥ ১৩॥

শ্রীবৈকুণ্ঠমিদং পদাব্জযুগমিত্যাদর্শযন্নাত্মনাং
শ্রীহস্তস্তব দক্ষিণশ্শমযতে তাপং ভবোপার্জিতম্ ।
হস্তোঽন্যঃ কটিসঙ্গতঃ কথযতে কুক্ষিস্থসঙ্খ্যাতিগ-
ব্রহ্মাণ্ডাতিভরোদ্ধৃতের্দৃঢবলং মধ্যস্য কর্তুং দশাম্ ॥ ১৪॥

অন্যো দক্ষিণপাণিরপ্যমররাজাত্যন্তবাধাকৃতাং
দৈত্যানাং বধকারি চক্রমনিশং ধত্তেঽঞ্জনাদ্রিপ্রভো ।
অন্যো বামকরস্তদজ্ঞনযনাগর্বৈকনির্ভেদনা-
রাবং শঙ্খমুদারচন্দ্রসুষমং ধত্তে ত্রিলোকীবিভো ॥ ১৫॥

যস্মিন্ কৌস্তুভবিম্বিতাং নিজতনুং দৃষ্ট্বা রমাঽন্যের্ষ্যযা
ত্বাং পশ্যত্যধ ঈক্ষ্যদৃক্প্রসরণৈর্বক্ষস্তদুদ্ভাবযে ।
সংবর্তে বিশতে যদন্তরগৃহং ব্রহ্মাদিজীবাবলিঃ
তস্যাং তে বিনিবর্ততে চ জঠরং তৎকীর্তযে তে হরে ॥ ১৬॥

ব্রহ্মাবাসপযোজনালনিলযং মে চিত্তহং সোঽধুনা
লাবণ্যামৃতপূরিতং প্রবিশতে নাভিহ্রতং তাবকম্ ।

কীর্যৎকাঞ্চনবারিজাযতরজস্তুল্যাম্বরালঙ্কৃতং

বল্গন্মেখলযা পরিষ্কৃতমহং মধ্যং ভজে সুন্দরম্ ॥ ১৭॥

রম্ভাস্তম্ভমদেভহস্তকরভপ্রাগল্ভ্যচৌর্যক্ষমৌ

ঊরূ মে হৃদযাব্জদর্পণতলস্তংভানুভাবং গতৌ ।

স্বামিন্নঞ্জনশৈলনাথ সততং সেবে ভবজ্জঙ্ঘিকে

স্ফূর্জন্মন্মথকাহলীকমলগর্ভাকারলীলা জুষৌ ॥ ১৮॥

স্বামিন্ বেদসুবর্ণহংসককৃতপ্রোদ্বেলশোভাঝরী-

চঞ্চদ্দিব্যমুনীশমানসসরোজাতাব্জলীলাবহৌ ।

নিত্যং শ্রীকরপল্লবানুকলনাসংবাহিতৌ সুন্দরৌ

পাদৌ তেঽঞ্জনশৈলনাযক নিধিপ্রাযৌ সদা সংশ্রযে ॥ ১৯॥

প্রাগুত্তুঙ্গপযোধিবারিধিজলে ত্বং যোগনিদ্রাং ভজন্

নাভিপ্রোত্থিতপঙ্কজস্থিতবিধিং দৃষ্ট্বা বহুব্যাকুলম্ ।

পুচ্ছোদ্ঘট্টনকম্পিতাখিলজগন্মীনাকৃতিং ভেজিবান্

ঘোরাকারযুতং সুরারিমবধীশ্চোরং শ্রুতীনাং হরে ॥ ২০॥

জৃম্ভদ্দৈত্যসুপর্ববাহুপটলীসংসক্তসর্পাধিরাড়্-

ভোগালীঢবিঘূর্ণিতাবনিধরে মগ্নে জলে বারিধেঃ ।

বাত্সল্যাদুদধার্ষি ? ভূধরমমুং ত্বং কচ্ছপাকারবান্

ব্রহ্মেশানবলারিপু স্তুতিপরেষ্বম্ভোরুহাক্ষ প্রভো ॥ ২১॥

স ত্বং জৃম্ভিতঘুর্ঘুরারববিভিন্নাশাবশাবল্লভ-

শ্রোত্রো যজ্ঞবরাহমূর্তিরসুরং হত্বা হিরণ্যাক্ষকম্ ।

অম্ভোধৌ সরসীব নাগদশনাগ্রাসক্তপদ্মাকৃতিং

দংষ্ট্রাগ্রেণ রসামধার্ষি ভগবঞ্ শ্রীশেষভূভৃদ্বিভো ॥ ২২॥

প্রহ্লাদাভযদামরেশ্চ ভযদাং তে নারসিংহীং তনুং

বন্দে ভূরিসটাচ্ছটাবিদলিত প্রোত্তুঙ্গ ধারাধরাম্ ।

ঘূর্ণৎপাটলনেত্রকোণনিপতজ্জ্বালাস্ফুলিঙ্গাবৃত-

ক্ষোণীচক্রতলাং হিরণ্যকশিপুপ্রধ্বংসিকাং শ্রীবিভো ॥ ২৩॥

ভিক্ষুত্বাট্টহৃদৈন্যতো বলিসখে খিন্নস্তদা সাযনৈঃ বামনঃ

তিষ্ঠন্বেঙ্কটভূধরে বহুজনাদ্বিত্তং বলাদাপ্স্যসে ।?

ক্ষত্রান্ পাপবতো মহাবলযুতাংস্ত্রিস্সপ্তকৃত্বোঽবধীঃ

তীক্ষ্ণাগ্রেণ পরশ্বথেন ভগবংস্ত্বং ভার্গবস্সন্ হরে ॥ ২৪॥

রামো দাশরথির্ভবংস্ত্রিভুবনপ্রখ্যাততেজোরবি-

প্রোদ্বেলাংশুগণৈরিবাতিনিশিতৌস্সান্দ্রৈশ্শরৈস্সানুজঃ ।

শেষাদ্রীশ বিভো সুরারিমবধীস্সীতারমাচোরকং

পৌলস্ত্যং দশকন্ধরং যুধি জগদ্বিদ্রাবণং রাবণম্ ॥ ২৫॥

স্বামিন্ হন্তুমশক্যমম্বুজভবাস্ত্রাদ্যৈশ্শরৈস্তীক্ষ্ণৈঃ

কক্ষে রাবণমানিবধ্য চতুরো বার্ধিন্ য আসেদিবান্ ।

তাদৃগ্বিক্রমশালিনং বলবতামগ্রেসরং বালিনং
ধৈর্যাদেকশরেণ ঘোরমবধীশ্চিত্রং মহত্ত্বং তব্ ॥ ২৬॥

ত্যক্ত্বা ত্বামিহ ধর্মরূপমনঘং যত্তুচ্ছধর্মার্থিনে
ত্বৎপত্রে ন কৃতৈব মোক্ষসরণির্জাতায সূর্যান্বযে ।
তৎকার্যং মম ধর্ম ইত্যভিমতং প্রাপ্তায গৃধ্রায বৈ
তচ্চিত্রং পরমং পদং ভগবতা দত্তং ত্বযা শ্রীবিভো ॥ ২৭॥

যস্তে ভূর্যপরাধকৃচ্ছলমতির্দৃপ্তশ্চ কাকাসুরঃ
পাপাত্মা ভবদস্ত্রঘর্ষণভিযা ধাবন্বিধীন্দ্রেশ্বরান্ ।
মাং রক্ষধ্বমিতীচ্ছযা শরণমাগম্যাক্ষমৈরক্ষিতুং
ত্যক্তস্তৈঃ পুনরাগতস্তব কৃপাপাত্রং বভূব প্রভো ॥ ২৮॥

অত্রত্যাখিলভক্তরক্ষণমিষাদ্ব্রহ্মাদিভিঃ সংস্তুতঃ
কান্তারে পিতৃবাক্যপালনপরঃ স্বাম্যাগমিষ্যত্যসৌ ।
ইত্যেবং দৃঢনিশ্চযাত্তমনসা দত্তং শবর্যা ফলং
ভুক্ত্তা তৃপ্তিমবাপ্যসে রঘুবর শ্রীশেষভূভৃদ্বিভো ॥ ২৯॥

ক্রূরাণাং ভুবি দানবাম্শজনুষাং কংসাদিদুষ্টাত্মনাং
সংহারায বসুন্ধরাস্থিতজনাত্যন্তব্যথাকারিণাম্ ।
শ্রীকৃষ্ণোঽসি নিজাঙ্ঘ্রিপদ্মযুগসেবাসক্তশিষ্টাত্মনাং
সংরক্ষাভরকারণায চ হরে শ্রীশেষভূভৃদ্বিভো ॥ ৩০॥

পৌরাবেদিতনৈজচেষ্টিতগণানাকর্ণ্য মাত্রা ভৃশং

কুপ্যন্ত্যা যদুলূখলে দৃঢতরং রজ্জ্বা নিবদ্ধো ভবান্ ।

লীলাভিস্তদুলূখলং করতলেনোদ্ধাট্য গত্বাঽর্জুন-

দ্বন্দ্বস্যামররূপতামবিদধচ্ছেষক্ষমাভৃদ্বিভো ॥ ৩১॥

বালে মাতুলসংজ্ঞকেন রিপুণা কংসেন যা প্রেষিতা

বক্ষোজ (দ্বয) গুপ্তভূরিগরলা তৎপূতনা যা পুরা ।

স্তন্যং ক্ষ্বেলমযং সহাসুভিরহো পীত্বা চ নিশ্চেতনাং

কৃত্বা তাং গিরিসন্নিভামবিহরচ্ছ্রীমান্ ভবান্ শ্রীবিভো ॥ ৩২॥

একং বালমধো বিধায বিজনে স্থিত্বা চ তস্যোপরি

ক্ষিপ্রং গোপগৃহে পিবন্ দধি মহাযন্ত্রে ঘটান্তঃস্থিতম্ ।

শেষং তস্য মুখে বিমৃজ্য সহসা নির্গত্য তত্রান্তরে

হ্যাযাতৈর্গৃহিভির্নিরীক্ষ্য স ভবান্ তং তাহিতং প্রাহসত্ ॥ ৩৩॥

বাল্যেন ত্বযি মৃত্তিকাং কবলযত্যাক্রোশতঃ সাদরং

মাত্রা মৃৎপরিহারণায বদনং চোদ্ধাঠ্য তে পাণিনা ।

যত্রালোক্য কিলাব্জজাণ্ডপটলীমাশ্চর্যসংমোহিতা

তস্থাবঞ্জনশৈলনাযক হরে মাযা তবাত্যদ্ভুতা ॥ ৩৪॥

কালিন্দীসবিধে বিনোদমুরলীনাদেন সংমোহিতাঃ

সুন্দর্যস্ত্বরযাঽঽগতাঃ স্মরনিভং ত্বাং বীক্ষ্য গোপাঙ্গনাঃ ।

ত্বদ্ব্রহ্মাত্মকতাবিলোকনদশাপন্না মুনীশা যথা
দিব্যানন্দপয়োধিমগ্নমনসোঽভূবন্ বৃষাদ্রি প্রভো ॥ ৩৫॥

হে স্বামিন্ যমুনাতটে তব পরং বেত্তুং মহত্ত্বং পুরা
বৎসান্ ধেনুগণাংশ্চ গোপপৃথুকান্ ধাত্রা স্বমায়াহৃতান্ ।
জ্ঞাত্বা তাদৃশরূপকাংস্ত্বমপি তান্ কৃত্বা মনোহঙ্কৃতিং
ছিত্ত্বা তস্য বহূকৃতিং চ কমলাস্বামিন্নকার্ষীঃ প্রভো ॥ ৩৬॥

অক্রূরায ভবৎপদৈকপ্রনসে পূর্বং ত্বয়া দর্শিতান্
দীপ্যৎকৌস্তুভশঙ্খচক্রমকুটীশ্রীবিদ্যুতা শোভিতান্
দিব্যানন্দময়ামিতামৃতরসাসারপ্রদান্ শ্রীবিভো
সেবেঽহং বহুবিগ্রহান্ ঘননিভাংস্ত্বদ্বিশ্বরূপাত্মকান্ ॥ ৩৭॥

বিভ্রল্লাঙ্গলমাযুধং সুররিপূন্ ভিন্দন্ সপক্ষান্নৃপান্
সংরক্ষন্ করুণার্দ্রদৃষ্টিভিরমূন্ লোকান্ সমালোকয়ন্
ইন্দ্রাদ্যৈর্দিবিজৈস্স্তুতে কটিতটীনীলাম্বরালঙ্কৃতো
রেবত্যা হৃদয়প্রিয়োঽসি ভগবন্ শ্রীশেষভূভৃদ্বিভো ॥ ৩৮॥

বুদ্ধোঽসি ত্রিপুরাঙ্গনাব্রতকৃতে ভঙ্গং বিধায়াসুরান্
তদ্ভর্তৄন্ শিতিকণ্ঠসায়কহতান্ কৃত্বা পুরা শ্রীবিভো ।
ম্লেচ্ছান্বাজিখুরোদ্ধতক্ষিতিপরাগাচ্ছাদিতাশাম্বরান্
ক্ষুদ্রান্ ভূরিবলান্ নৃশংসচরিতান্ কল্কী হরিষ্যস্যহো ॥ ৩৯॥

Stotram Digitalized By Sanskritdocuments.org

পঙ্কেজাতভবো জগজ্জননকৃদ্ব্রহ্মা চতুর্ভির্মুখৈঃ

ক্ষোণীমণ্ডলভারবাহচতুরশ্শেষস্সহস্রাননৈঃ ।

যৎখেলাবিহিতাবতারগণনাং কর্তুং ন শক্তো হরে

তেঽনন্তাঃ খলু দিব্যমঙ্গলগুণৈঃ সংশোভিতাস্তাবকাঃ ॥ ৪০॥

ত্বৎপাদাম্বুজযুগ্মচিন্তনসুধাপানৈকলোলাত্মনঃ

পুংসো মানসমন্যদেব বিষযং কৃত্যং কথং বাঞ্ছতি ।

ত্যক্ত্বা দিব্যরসালসালজনিতং মাধুর্যসারং ফলং

কীরঃ কাঙ্ক্ষতি কিং শলাটুপটলং নৈম্বং হরে শ্রীবিভো ॥ ৪১॥

অজ্ঞানাবৃতমাত্মধর্মরহিতং দূষ্যং চ নীচৈর্গুণৈঃ

নানাদুর্বিষযানুষক্তহৃদযং ক্ষুদ্রং কৃতঘ্নং জডম্ ।

ত্বদ্ভক্তেষু কৃতাপচারমপি মাং সংরক্ষসে ? বন্ধুবত্

তস্মাত্ত্বাং ন চ বিস্মরামি সততং শ্রীশেষভূভৃদ্বিভো ॥ ৪২॥

সংশোধ্যন্মণিদীপকস্থিরদৃশা সন্যাংশিতাস্সন্ত্যজন্ ?

লব্ধ্বা বজ্রমনর্ধমাত্তকুতুকস্সন্ন ত্যজত্যাদরাত্ ।

ত্রয্যা শোধযতা মুমুক্ষুরখিলান্ সামান্যদেবাংস্ত্যজন্

লব্ধ্বা ত্বাং শরণং পরাৎপরতরং হৃষ্যন্ন মুঞ্চত্যহো ॥ ৪৩॥

ভূসংস্থাশ্চ পরাশরপ্রভৃতযঃ খে নারাদাদ্যর্ষযঃ

পঙ্কেজোদ্ভবলোকসংস্থমুনযস্সর্বে সনন্দাদযঃ ।

Stotram Digitalized By Sanskritdocuments.org

তৎসাযুজ্যসমুদ্যজোঽপি পরমে ব্যোম্নি স্থিতাস্সূরযঃ
ত্বমেবাঞ্জনশৈলরাজনিলযং পস্যন্তি বৈ সন্ততম্ ॥ ৪৪॥

শেষাদ্রেশ্শিখরে সুবর্ণরচিতে সালে কটাহাকৃতৌ
গুপ্তং মূলধনং যথা তব পরব্রহ্মস্বরূপং হরে।
বিজ্ঞানাঞ্জনমুদ্রিতান্তরদৃশা দৃষ্ট্যা ভৃশং যোগিনঃ
প্রযচ্ছন্নুপলভ্য মোক্ষসরণীদারিদ্র্যনির্মোচনম্ ॥ ৪৫॥

ঈশানং জগতামনন্তগুণিনং দিব্যোল্লসদ্বিগ্রহং
লক্ষ্মীশং ধৃতশঙ্খচক্রমনঘং শেষক্ষমাভৃদ্বিভো।
সত্যং জ্ঞানমনন্তমিত্যভিমতশ্রুত্যর্থবৈষম্যতঃ
ব্যাচক্ষন্ কুদৃশো নিরাকৃতিকলং ত্বাং নির্গুণং মাযিনঃ ॥ ৪৬॥

ব্রহ্মাদ্যঈঃ সকলৈস্সুপর্বপতিভির্যদ্বৈ দুরাপং পদং
ধ্যানোন্মীলিতযোগিনামপি ভৃশং যচ্চেতসাং দূরগম্।
যদ্বাচামপি দূরবর্তি পরমং দদ্ধাম লক্ষ্মীবিভো
ত্বৎপাদাব্জযুগপ্রপত্তিনিরতা গচ্ছন্তি সৌলভ্যতঃ ॥ ৪৭॥

ত্বদ্ভক্তো নিবসন্নিহৈব দ্রুহিণস্যাণ্ডাদ্বহিস্সংস্থিতে
বৈকুণ্ঠেঽনুভবত্যপারকরুণং ত্বাং দিব্যদৃষ্ট্যা হরে।
বাৎসল্যাদনুবর্তসে ত্বমপি তং নিত্যানপাযাত্মনা
বৎসং ধেনুরিবানুলালনরতা শ্রীশেষভূভৃদ্বিভো ॥ ৪৮॥

শেষাদ্রীশ কিযন্নিশাকরসুধাসারাসুলুণ্টাকিনী ?
দৃক্ তে সঞ্চরিণী জিজীবযিষতে জাগৎকজীবব্রজান্ ।
কল্পস্স ব্যবহ্নী হ্যভিধী যতে সহি লযঃ কালঃ পরীফণ্যতে
হালাহল্যশিখাবলীসহচরী যস্মিন্বিসর্পিষ্যতি ॥ ৪৯॥

সৃষ্ট্যাং ভৌতিকরূপকাণ্যপঘনান্যাস্বাদ্য বৈ প্রাণিনঃ
পুণ্যাপুণ্যপরীণতানি পরিতশ্চারাচরব্যাপিনঃ ।
স্বর্গং নার্কমম্বুজাসনপদং ধাত্রীমধোবিষ্টপং
যাতাযাতশতৈঃ প্রযান্তি ভবতে মাযাবিমোহীকৃতাঃ ॥ ৫০॥

মাযাবৃত্তকলেবরান্তরগতাস্সর্বে তনূভৃদ্গণাঃ
ব্রহ্মাণ্ডান্তরকোণকূপকুহরে বিভ্রামিতাঃ কর্মভিঃ ।
তন্নিষ্ক্রামিকমার্গবোধরহিতাস্তিষ্ঠন্তি মূঢাত্মকাঃ
বদ্ধদ্বারবিটঙ্কমধ্যবিচরাঃ কীটা ইব শ্রীবিভো ॥ ৫১॥

এতাযস্তাবদ্ভবমগ্নজন্তুগণিতঃ পাপাত্মনামাদিমঃ
ক্ষুদ্রঃ ক্রূরমনা নৃশংসচরিতস্চাপল্যদোষাকরঃ ।
দৃপ্তস্সন্ততনীচকৃত্যনিরতো গত্যন্তরাভাববান্
সোঽহং তে চরণৌ ব্রজামি শরণং শ্রীশেষভূভৃদ্বিভো ॥ ৫২॥

সর্বেষ্বব্জভবাণ্ডকোটিষু জনাস্সঙ্খ্যাপরাশ্চেৎসদা
তেষামাযুরনন্তকালিকমিতি স্যাচ্চেৎপরার্ধাদিকম্ ।

সঙ্খ্যাঽন্যা সমুপার্জিতা যদি ভবেদাজন্মজন্মান্তরং

স্বামিন্ মৎকৃতপাতকানি গণিতুং শক্যানি লক্ষ্মীবিভো ॥ ৫৩॥

আস্তাং কল্পশতানুভাব্যদুরিতব্রাতঃ পরং দুর্বচঃ

ত্বৈৎকঙ্কর্যরুচিঃ কদাচিদপি বা নাস্ত্যেব মে পাপিনঃ

শেষক্ষ্মাধরনাথ মামথ যতো রক্ষেতি বাঙ্নাস্তি তত্

স্বামিন্ কেবলতাবকীযকৃপযা সংরক্ষণীযো হরে ॥ ৫৪॥

পুত্রত্বান্ন চ হাতুমিচ্ছসি হরে পাপাত্মকত্বাচ্চ মাং

স্বামিন্নানুগ্রহীতুমিচ্ছসি পরং নাচা ? শঙ্ক্য দৌষ্কামিকম্ ।

তস্মান্নারকদুঃখহেতুদুরিতং দৃষ্ট্বা পরং দুঃখ্যসি

হাহা হন্ত তবাপি দুঃখবশতাং দাস্যামি লক্ষ্মীবিভো ॥ ৫৫॥

পাপানীহ মযা কৃতানি গণিতুং শক্যানি লক্ষ্মীবিভো

সদ্যস্তানি সমুহ্য বারয কৃপাদৃষ্ট্যা নিরাতঙ্কযা ।

যদ্বা তাবকভক্তিমেব পরমাং তন্নিষ্কৃতিং দেহি মে

নোপেক্ষ্যশ্শরণাগতঃ খলু ধরানাথস্য সত্যাত্মনঃ ॥ ৫৬॥

যদ্বা দুর্বচপাপকৃত্যনিরতং মং রক্ষ লক্ষ্মীবিভো

বাৎসল্যাদিগুণোদধিং মম গুরুং সংবীক্ষ্য সত্ত্বাত্মকম্ ।

কৃত্বা মাযিনিরাকৃতিং তব মতপ্রখ্যাতনির্বাহকং

ব্রহ্মেন্দ্রাদিকিরীটরত্নসুষমানীরাজিতাঙ্ঘ্রে হরে ॥ ৫৭॥

ত্বদ্যাথাত্ম্যনিবোধকে মনুবরে নিষ্টামবাপ্যাদরাত্
ওঙ্কারার্থমবেত্য তত্ত্বসশরণাণস্তন্নারশব্দোদিতম্
অর্থং চাযনশব্দবেদ্যমমলং ব্যুৎপত্তিযুগ্মেপ্সিতং
মুক্তস্স্যাদ্বিবুধোচিতার্থমপি বৈ জ্ঞানী চতুর্থীরিতম্ ॥ ৫৮॥

লক্ষ্মীনাথ পরাত্মনশ্চিদচিতোস্তত্ত্বস্য রূপং বিদন্
শেষিত্বং ভবতশ্চরাচরবিভোশ্শেষত্বমপ্যাত্মনঃ ।
বৈষম্যং প্রকৃতের্বিচায সদুপাযোপেযভাবাত্ সুধীঃ
ত্বৎপাদৌ শরণং গতস্তদিতরো সন্মুক্তো ভবেৎসন্ত্যজন্ ॥ ৫৯॥

সুক্তস্সংপ্রতিপূজিতস্সুরবরৈর্ব্রহ্মাদিভিস্সংব্রজন্
অণ্ডং চাবরণান্যতীত্য চ মহাব্যক্তেস্তক্তে ত রব্বৈ ততঃ
স্নাতস্সন্ বিরজাসরিত্যথ ভজন্ দিব্যোল্লসদ্বিগ্রহং
বৈকুণ্ঠং ভবতৈব নন্দতি সমং শ্রীশেষভূভৃদ্বিভো ॥ ৬০॥

সৌবর্ণাঞ্চিতদিব্যবজ্রফলকপ্রত্যুপ্তসালাবৃতে
ভব্যোত্তুঙ্গসহস্ররত্নখচিতস্তম্ভোদ্ধৃতে মণ্ডপে ।
দেবীভিস্সহ সংস্থিতং ফণিপতের্ভোগে ফণালঙ্কৃতে
ধ্যাযে ত্বাং ধৃতশঙ্খচক্রমনঘং সংবেষ্টিতং সূরিভিঃ ॥ ৬১॥

দিব্যং তৎপুরধামনামকপুরদ্বারোল্লসদ্গোপুরং
ভাস্বৎকোটিসমপ্রভং হৃদি সদা ধ্যাযেঽঞ্জনাদ্রিপ্রভো ।

তস্মিন্ যা বিরজা নদী প্রবহতে তস্যোভয়োঃ পার্শ্বয়োঃ

সৌবর্ণদ্রুমপুষ্পগুচ্ছসুরভীণ্যুদ্যানবৃন্দানি চ ॥ ৬২ ॥

হরে সূরযন্তে পরে ধাম্নি সংস্থাঃ

নমন্তো বদন্তেতো ভবৎকীর্তনানি ।

প্রগীযযাথ সাম প্রধীযন্তি কীর্তিং

বিতন্বন্তি নিত্যং বিচিত্রং চ কৃত্যম্ ॥ ৬৩॥

ক্বচিৎকীররূপা হরে সূরযন্তে

প্রবক্ষ্যন্তি নামানি শাখিব্রজেষু ।

ক্বচিদ্ভৃঙ্গরূপা ভবন্মাল্যগন্ধান্

সমাঘ্রায দিব্যং প্রমোদং লভন্তে ॥ ৬৪ ॥

তব পরমপদে বৈ সূরযঃ পার্শ্বযোস্তে

পরিষদি রচযন্তে দ্রাবিডাম্নাযগানম্ ।

ইতি যতিকুলনাথশ্রীশঠারিপ্রমুখ্যাঃ

অপি চ গুরুবরাস্তে মঙ্গলান্যাচরন্তি ॥ ৬৫॥

শ্রীশেষশৈলশিখরে চিদচিদ্বিশিষ্টং

শ্রীসংশ্রিতোরসমপারকৃপৈকপাত্রম্ ।

আপাদশীর্ষমবলোক্য হরে জনাস্ত্বাং

ভক্তাভযপ্রদ সদৈব মুদং লভন্তে ॥ ৬৬॥

Stotram Digitalized By Sanskritdocuments.org

অম্মঙ্গিবেঙ্কটাচার্যচরণাম্বুজসংশ্রিতঃ ।

চকার রঘুনাথার্যঃ শেষভূভৃদ্বিভোস্তুতিম্ ॥

॥ ইতি তিরুনন্দা঳্বংশরঘুনাথাচার্যেণ কৃতং

বৃষাদ্রিনাথস্তোত্রং সংপূর্ণম্॥

Encoded and proofread by Malleswara Rao Yellapragada

malleswararaoy at yahoo.com

From a telugu book veNkaTeshakAvyakalApa

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vrushadrinatha Stotram Lyrics in Bengali PDF
% File name : vRiShAdrinAthastotram.itx
% Location : doc_vishhnu
% Author : tirunandALvaMsharaghunAthAchArya
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Source : Venkatesha Kavyakalapa
% Latest update : April 4, 2015
% Send corrections to : sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 10, 2015 ] at Stotram Website